चक्षुःशून्ये, चक्षुरादीन्द्रियशून्ये च । "अपानक्षासो बधिरा अहासत" इति ऋ० ६,७२,६, अनक्षासस्त्वक्षुर्व्वर्ज्जिताः इति भा० वेदे सौमप्रास इति वत् अनक्षास इति । रूपसिद्धिः ।

**अनक्षर** न० अप्रशस्तान्यक्षराणि यत्र ब० । सदूषणप्राक्षेपके दोषोद्घोषकवाक्ये, अवाच्ये निन्दावचने, (गालि) इति प्रसिद्धे दुष्टवचने च । न सन्ति अक्षराणि ज्ञेयत्वेनास्य । अक्षरज्ञानशून्ये मूर्खे त्रि० ।

**अनक्षि** पु० अप्रशस्तं मन्दमक्षि न०त० । मन्दनेत्रे । ब० । षच्समासान्तः । तत्र अनक्ष इत्येव । तद्वति । स्त्रियां ङीष् ।

**अनगार** त्रि० नास्ति अगारमस्य । गृहशून्ये । अनिकेतने । प्रव्रजिते, मुन्यादौ च पु० ।

**अनग्न** त्रि० न नग्नः । अदिगम्बरे आच्छदनवति च "यह्वोन-वसना अनग्ना" इति ऋ० ३,१,६,। "स होवाच किं मे वासो भविष्यतीत्याप इति होचुस्तस्माद्वा एतदशिष्यन्तः पुर-स्ताच्चोपरिष्टाच्चाद्भिः परिदधति लम्भुको यथा वासो भवत्य-नग्नो ह भवतीति छा०उ०। "तस्मात्प्राणस्य वास आप-स्तस्माद्वा एतदशिष्यन्तो भोक्ष्यमाणा भुक्तवन्तश्च आह्लृणा विद्वांस एतत्कुर्वन्ति । किं अद्भिर्वासस्थानीयाभिः पुरस्ता-द्भोजनात्पूर्व्वमुपरिष्टाच्च भोजनादूर्द्ध्वञ्च परिदधति परिधानं कुर्व्वन्ति मुख्यस्य प्राणस्य लम्भुको लम्भनशीलो वासो-भवति । वाससो लब्धैव भवतीत्यर्थः । अनग्नो भवति । वाससो लम्भुकत्वेनार्थसिद्धैवानग्नता इत्यनग्नो ह भवतीत्युत्तरीयवान् भवतीत्येतत्" इति भाष्यम् ।

**अनग्नि** पु० नास्ति अग्निः श्रौतः स्मार्त्तो वाऽस्य । श्रौतेन स्मार्त्तेन वा विधिना अनाहिताग्नौ गृहस्थभेदे, सर्व्वथा अग्निशून्ये, प्रव्रजिते च । "अनग्निरनिकेतश्च मुनिर्मूल-फलाशन" इति मनुः । न०त० । अग्निभिन्ने पु० । "अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचिदिति" स्मृतिः । ७ब० । अग्निचयनरहिते यज्ञे च । "अनग्नावुत्तरवेदिम्, कात्या० २६,७,११, "अनग्नौ अग्निरहिते अनग्नि-चित्ये यज्ञे, उत्तरवेदिं प्रतिगच्छतीति" तद्व्याख्या ।

**अनग्नित्रा** न अग्निं त्रायते रक्षति अस्म०स०। अग्निरक्ष-णाकरे पापिष्ठे "अनग्नित्रा अभ्यमन्त कृष्टीः ऋ० १,१८६, २, "अनग्नित्राः पापिन्यः कृष्टयः प्रजा" इति भा० ।

**अनग्निदग्ध** त्रि० न अग्निना दग्धः अस०स०। श्मशानकर्म्मणि अग्निसंस्कारहीने "ये अग्निदग्धा ये अनग्निदग्धा मध्ये दिवः" इति ऋ० १०,१५,१४, "अनग्निदग्धाः श्मशान-कर्म्म न प्राप्ता" इति भा०। विप्राणां पितृभेदे "अग्निदग्धा-नग्निदग्धान् काव्यान् बर्हिषदस्तथा अग्निष्वात्तांश्च सौमपांश्च विप्राणामेव निर्द्दिशेदिति" मनुः । वह्निना अदग्धे च ।

**अनघ** त्रि० नास्ति अघं पापं दुःख व्यसनं कालुष्यं वा यस्य । पापशून्ये, दुःखहीने, व्यसनशून्ये, मलशून्ये, स्वच्छे च । विष्णौ पु० "अनघो विजयो जेतेति" वि० सह० । "स आत्माऽपहतपाप्मेत्यादि" श्रुतौ तस्य पापराहित्योक्तेस्तथा-त्वम् । तत्र दुःखशून्ये, "दयालुमनघस्पृष्टमिति" माघः । दोषरहिते "अगाधसत्त्वानघा गुणा" इत्यमरः । व्यसनरहिते "कच्चित् मृगीणामनघा प्रसूतिः ? इति" रघुः ।

**अनङ्ग** न० नास्ति अङ्गमाकारो यस्य । आकाशे, चित्ते च । कन्दर्पे पु० । अङ्गशून्यमात्रे त्रि० । तत्राकाशस्य निर-वयवत्वात्, न्यायवैशेषिकनये चित्तस्याणुत्वेन च निरवयवत्वा-त्तथात्वम् । कामस्य हरनेत्रेण दग्धाङ्गत्वात् अनङ्गत्वम् । तत्कथा च शिवपुराणे "कामोधनुषि संयोज्य पुष्पबाणं तदा मुने ! पार्वतीसम्मुखे स्थाणौ मोक्तुकामो व्यव-स्थितः । हरस्तु धैर्य्यमालम्ब्य किमेतदिति चिन्तयन् । ददर्श पृष्ठतः कामं पुष्पबाणधनुर्धरम् । विदग्धमन्योस्त-स्याथ तृतीयनयनात् मुने ! । स्फुरन् दर्च्चिरगिनस्तु पपात मदनोपरि । क्रोधं संहर हे देव ! इति यावत् वदन्ति खे । इन्द्रादिसकला देवास्तावद्भस्मीचकार तम्" इति । "त्वमनङ्गः कथमक्षता रतिरिति" "तनुतां दुःखमनङ्ग ! मोक्ष्यतीति" च कुमा० । अङ्गमुपकरणं न०त० । अङ्ग-भिन्ने । न०ब० । तच्छून्ये त्रि० ।

**अनङ्गक्रीडा** स्त्री अनङ्गेन क्रीडा । कामहेतुकक्रीडायाम् । "अष्टावङ्गे गा इभ्यस्ता यस्याः सानङ्गक्रीडेत्युक्तेति" (वृत्त०) उक्ते मात्रावृत्तभेदे च ।

**अनङ्गलेख** पु० अनङ्गस्य तद्व्यञ्जको लेखः । कामव्यञ्जकलेखे । "अनङ्गलेखक्रियययोपयोगमिति" कुमा० ।

**अनङ्गशेखर** पु० क्रमेण लघुगुरुनिवेशवति दण्डकभेदे, छन्दो-विशेषे । यथा "लघुर्गुरुः क्रमेण यत्र बध्यते सुधीभिरि-च्छया स दण्डकस्त्वनङ्गशेखरः स्मृतः" इति छन्दो० ।

**अनङ्गासुहृत्** पु० ६त०। शिवे तस्य तद्देहभस्मीकरणात्तत्त्वम् ।

**अनच्छ** त्रि० न अच्छः निर्मलः न०त०। कलुषे, अप्रसन्ने च ।

**अनञ्जन** न० न अज्यते लिप्यते अनुज-कर्मणि ल्युट् न०त०। निःसम्बन्धे, आकाशे, परब्रह्मणि च । "निरञ्जनं साम्यमुपैति दिव्यमिति" श्रुत्या तस्य सम्बन्धराहित्योक्तेस्तथात्वम् । अञ्जनं दोषस्तद्रहिते नारायणे पु० । तथाभूतवस्तुमात्रे